६५०६

ॐ

सद्गुरुश्रीत्यागराजस्वमिने नमो नमः

# श्रीकृष्णाष्टकम्

*गीताचार्याय विद्महे। श्रीकृष्णाय च धीमहि। तन्नो विष्णुः प्रचोदयात्।*

परमात्मस्वरूपाय नारायणाय विष्णवे ।
परिपूर्णावताराय श्रीकृष्णाय नमो नमः ॥ १

देवकीप्रियपुत्राय यशोदालालिताय च ।
वासुदेवाय देवाय नन्दनन्दाय ते नमः ॥ २

गोपिकानन्दलीलाय नवनीतप्रियाय च ।
वेणुगानाभिलोलाय राधाकृष्णाय ते नमः ॥ ३

गोविन्दाय मुकुन्दाय कंसादिरिपुदारिणे ।
मातापितृसुनन्दाय द्वारकापतये नमः ॥ ४

रुक्मिणीप्रियनाथाय रुग्मपीताम्बराय च ।
सत्यभामासमेताय सत्कामाय नमो नमः ॥ ५

पाण्डवप्रियमित्राय पाञ्चालीमानरक्षिणे ।
पार्थानुग्रहकाराय पार्थसारथये नमः ॥ ६

गीतोपदेशबोधाय विश्वरूपप्रकाशिने ।
वेदान्तसारसत्याय वेदनादाय ते नमः ॥ ७

सदासक्तसुरक्षाय सदामानसवासिने ।
सदात्मानन्दपूर्णाय श्रीकृष्णाय नमो नमः ॥ ८

त्यागब्रह्मसुगीताय गीतपुष्पार्चिताय च ।
मनोवाक्कायपूर्णाय श्रीकृष्णाय सुमङ्गलम् ॥

कृष्णाष्टकमिदं पुण्यं कृष्णप्रेर्यं शुभप्रदम् ।
पुष्पार्चनसुपद्यं च श्रीकृष्णसुकृपावहम् ॥

शुभमस्तु